तस्याम् ६अपराजितायां ७जरतीतृणे च स्त्री राजनि०

**सुनीलक** पु० सुनील इव कायति कै-क । १नीलभृङ्गराजे २नीलासने ३नीलरत्ने च राजनि० ।

**सुन्द** पु० १दैत्यभेदे उपसुन्दशब्दे १२२७ पृ०दृश्यम् ।२वानरभेदे रामा०ल०४७स०। ३राक्षसभेदे रामा०बा०२०स० ।

**सुन्दर** त्रि० सु+उन्द-अरन्-शक०। १मनोज्ञे अमरः स्त्रियां ङीप् सा च २उत्तमस्त्रियां ३त्रिपुरसुन्दर्य्यां देव्याञ्च । ४कामदेवे ५वृक्षभेदे च (सुन्दरि) पु० मेदि० ६योगिनीभेदे स्त्री तन्त्रम् "अयुजोर्यदि सौ जगौ, युजोः । भभरा लगौ यदि सुन्दरी तदा" छन्दो० उक्ते ७अर्द्धसमे वृत्तभेदे स्त्री । वृ०र० तु इयं वियोगिनीत्युक्ता ।

**सुपक्व** पु० सुन्दरं पच्यते सु+पच-क्त तस्य वः । १शोभनाम्रे शब्दच० । २सुन्दरपरिणते त्रि० । [पाके द्रव्यमात्रे ।

**सुपच** त्रि०भुक्तं सत् सुखेन पच्यते पच-कर्मणि खल् । लघु-

**सुपत्त्र** न० सुष्ठु पत्त्रमस्य । १तेजपत्रे शब्दच० २आदित्यपत्त्रे पु० । ३पर्णिवाहतृणे राजनि० ४सुन्दरपत्त्रयुक्ते त्रि०। ५रुद्रजटायां ६शतावर्य्यां ७पालङ्क्यां ८शम्यां ९शालपर्ण्याञ्च स्त्री राजनि० ।

**सुपत्त्रक** पु० सुष्ठु पत्त्रं पक्षोऽस्य कप् । १शोभाञ्जनवृक्षे २जतुकायां स्त्री राजनि० अत इत्त्वम् ।

**सुपथ** पु०सुष्ठु पन्थाः प्रा०स०वा अच्समा०। १सद्वर्त्मनि २सदाचारे च सुष्ठु पन्था यत्र अच्समा०। ३सुन्दरपथयुक्ते त्रि०।

**सुपथिन्** पु० प्रा० स० वा समासान्ताभावः । सत्पथे शब्दर० सुपन्थाः । [त्रि० ।

**सुपथ्या** स्त्री प्रा०स० । १श्वेतचिल्लीवृक्षे राजनि० २शोभनपथ्ये

**सुपद्मा** स्त्री सुष्ठु पद्यते पद्-म ।१वचायाम् शब्दच०। प्रा०ब०। २पद्मिन्यां स्त्री ।

**सुपर्ण** पु० सुष्ठु पर्णं पत्त्रं पक्षो वा यस्य । १गरुड़े अमरः २सुन्दरपर्णयुक्ते त्रि० ३स्वर्णचूड़खगे पुंस्त्री० स्त्रियां ङीष् ।४कृतमालवृक्षे पु०मेदि०५नागकेशरे पु०त्रिका०। कप् सुपर्णक । आरग्वधे वृक्षे सप्तच्छदवृक्षे जटा० गरुडे च हेमच० । शालपर्ण्यां रेणुकायां पलाश्यां स्वर्णजीवन्त्यां वाकुच्यां स्त्री कापि अत इत्त्वम् ।

**सुपर्णकेतु** पु० सुपर्णो गरुड़ः केतुर्यस्य । विष्णौ हला० ।

**सुपर्णी** स्त्री सुष्ठु पर्णान्यस्याः गौरा०ङीष् ।१पद्मिन्यां सुपर्णो गरुड़ोऽस्त्यस्या अच् गौरा०ङीष् ।२गरुड़मातरि च मेदि०

**सुपर्णीतनय** पु० ६त० । गरुड़े हला० ।

**सुपर्वन्** पु० सुष्ठु पर्व यस्य । १देवे अमरः २वाणे ३वंशे ४धूमे च मेदि० । प्रा०स० । ५सुन्दरे पर्वणि न० । [राजनि०।

**सुपर्वा** स्त्री सुष्ठु पर्व अस्त्यस्याः अच् टाप् । श्वेतदूर्वायाम्

**सुपाक्य** न० सुपाकाय हितम् यत् । १विड्लवणे राजनि० ।

**सुपार्श्व** पु० सुष्ठु पार्श्वोऽस्य । १प्लक्षवृक्षे (पाकुड) वृक्षभेदे २सम्पातिपुत्त्रे विहगभेदे च राजनि० ३सुन्दरपार्श्वान्विते त्रि० ।४मेरोरुत्तरस्थविष्कम्भपर्वते पु०धान्यशैलशब्दे ३८८२ पृ०दृश्यम् । संज्ञायां कन् । १गर्दभाण्डवृक्षे पु०अमरः ।

**सुपिङ्गला** स्त्री प्रा०स० । १ज्योतिष्मत्यां २जीवन्त्याञ्च राजनि०

**सुपीत** न० प्रा० स० । १गर्जरे (गाँजर) राजनि० । २सुन्दरपीतवर्णे पु० ३तद्वति त्रि० । [राजनि० ।

**सुपुट** पु० सुष्ठु पुटमस्य । १कोलकन्दे २विष्णुकन्दे च

**सुपुत्रिका** स्त्री सुष्ठु पुत्र इव पक्षः यस्याः कप् अत इत्त्वम् । जतुकायाम् (तेलापोका) राजनि० । [राजनि०।

**सुपुष्करा** स्त्री सुष्ठु पुष्करमस्याः अच् । स्थलपद्मिन्याम्

**सुपुष्प** न० प्रा० स० । १लवङ्गकुसुमे शब्दच० २प्रपौण्डरीके ३आहुल्ये ४तूले राजनि० ५स्त्रीणां रजसि च "सुपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो" शङ्कराचार्यस्तवः । सुष्ठु पुष्पमस्य कप् । (पालतामान्दार) वृक्षे । पाटलायां स्त्री राजनि० अत इत्त्वम् ।

**सुपुष्पी** स्त्री सुष्ठु पुष्पमस्याः ङीष् । १श्वेतापराजितायां २शतपुष्पायाम् ३मिश्रेयायां ४द्रोणपुष्प्यां ५जीर्णफञ्ज्यां राजनि० । ६कदल्यां शब्दच० ।

**सुपूर** पु० सुष्ठु पूर्य्यते सु+पूर-क । बीजपूरे राजनि० ।

**सुपूरक** पु० सुष्ठु पूरयति पूर-ण्वुल् । वकवृक्षे रत्नमा० ।

**सुप्** स्त्री व्याकरणपरिभाषिते सुप्रभृतौ सुप्पर्य्यन्ते प्रत्ययभेदे ।

**सुप्त** न० स्वप-भावे क्त संप्रसारणम् । १निद्रायां २शयने च ३सुसुप्तौ हेमच० कर्त्तरि क्त । ४निद्रिते त्रि० । "क्षुधितस्तृषितः कामी विद्यार्थी भयकारकः । भाण्डारी च प्रवासी च सप्त सुप्तान् प्रबोधयेत् । मक्षिका भ्रमरः सर्पो राजा वै बालकस्तथा । परश्वाऽपि च मूर्खश्च सप्त सुप्तांश्च बाधयेत्" नीतिसारः ।

**सुप्तघातक** त्रि० ६त० । हिंस्रे त्रिका० ।

**सुप्तजन** पु० सुप्तो जनो यत्र । १अर्द्धरात्रे जटा० । कर्म० । २निद्रिते लोके च ।

**सुप्ति** स्त्री स्वप-क्तिन् । १शयने २निद्रायाम् ३स्वप्ने च "करोति सुप्तिर्जनदर्शनातिथिम्" नैष० । ४स्पर्शतायां ५विश्वासे मेदि० ।

**सुप्रतिभा** स्त्री सुष्ठु प्रतिभा यस्याः ५व० । १सुरायाम् प्रा०